महापडितः वाचस्पतिबिरुदांकितः
श्रीमान् गुण्डेराव् हरकारे

उपोद्घातः

ग्रन्थोत्तमस्य रामायणस्य व्याख्यानानि काले काले तैस्तैर्महापण्डितै र्विरचितान्याध्यात्मिक विषयप्रतिपादकानि व्याकरण मीमांसादिशास्त्रसिद्धान्तपूर्वानि सामाजिक राजकीय सूक्ष्मतत्त्वावबोधनपराणि रसभावादि ध्वनितत्त्वप्रकाशकानि गान्धर्वशास्त्र प्रतिपादकानि बहुनि सन्ति ।

मयाऽधुना 'षोडशी' ग्रन्थः सादरमामूलाग्रमवलोकितः । अयं स्वतन्त्रो ग्रन्थो न कस्यपि व्याख्यारूपः । रामायणविषयमधिकृत्य स्वतन्त्रा अमूल्या विचारा अस्मिन् ग्रन्थे प्रदर्शिताः । अत्रभवान् श्रीमान् गुंटूरूशेषेन्द्र शर्मामहाशयो ग्रन्थस्यास्य प्रणेताऽऽन्ध्रांग्लगीर्वाण भाषासु निष्णातः कुशाग्रधिषणः नानातन्त्रप्रवीणः शाक्तागमरहस्यविशेषज्ञो वाल्मीकि रामायणाध्ययने कृतभूरिपरिश्रमोऽस्ति । अस्य महावैदिकस्य सूक्ष्मतमा विचारसरणिरनन्यादृशी । विविधतन्त्रागमसिद्धान्तान् सम्यगवगम्य संप्रदायाँश्च विज्ञाय तान्त्रिकरहस्यान्यन्यत्रादृष्टानि महाकविना महता कौशलेन रामायणे तत्र तत्रोपनिबद्धानीति सप्रमाणं प्रतिपादयति ग्रन्थकृत् । अत्र ग्रन्थरचयितुर्मौलिकी चिन्तनपद्धतिः कतिपयैरुदाहरणैः प्रदर्श्यते ।

रामायणमादिकाव्यमिति सर्वैरप्यङ्गीक्रियते । 'मा निषादे'ति छन्दोमयी वाक् महाकवेर्मुखादादौ निःसृतेति प्रतिपत्त्यैव केवलं न । अत्र विषये ग्रन्थकारः प्रत्यक्ष प्रमाणान्यनेकानि दर्शयति ।

महता परिश्रमेणानेकग्रन्थावलोकनेन सततव्यासङ्गेन चानन्यलभ्यानीमान्यगाधाम्बोधितलात् महार्धमौक्तिकानि समानीयेदं प्राथम्येन जगति प्रदर्शयति । तस्यायं संक्षेपः, रामायणे इतिवृत्तकथा सन्दर्भरूपेण प्रदर्शिताः । नायकनायिकाव्यापाराः सर्वेऽपि तान्त्रिकरहस्यपूर्णा वैदिकसंप्रदायप्रवर्तकाश्च । श्रीमद्रामायणं रहस्यपूर्णा वैदिकसंप्रदाय प्रवर्तकाश्च । श्रीमद्रामायणं रहस्यरत्नकोश एव । 'रहस्यं च प्रकाशं चे'ति बालकाण्डे द्वितीये सर्गे प्रदर्शित-

श्लोकद्वयार्थानुसन्धानेन रामायणोक्तो रामकथायाः प्रसिद्धोऽर्थोऽन्यो रहस्यार्थोऽन्यः । वाल्मीकी रहस्यमिदं महता कौशलेन जुगोप । ललितमनोहरशब्दैश्चैर्वनिपुणार्यै रसभावोज्ज्वलप्रकरणैश्चैकनपूर्वमावरणं निर्माय तस्मिँस्तन्त्र रहस्यरत्नमजूगुहत ।

एतद्रहस्यज्ञानाय बहवो ग्रन्थाः प्रवृत्ताः । प्रथमतः उपनिषदः । सीतोपनिषद्रामरहस्योपनिषद्राम तापिन्युपनिषदित्यादयः एतासूपनिषत्सु वाल्मीकि प्रोक्तं रामायणं मन्त्ररहस्यपूर्णमिति प्रतिपादितम् । तद्रहस्याव बोधायोपाया अनुष्ठानप्रकाराश्च दर्शिताः । अनन्तरं पौराणिकयुगे तद्रहस्यावगमाय विविधाः प्रयत्नाः कृता इति स्पष्टतया प्रतीयते । महाभारते ब्रह्माण्डपुराणे देवीभागवते मार्कण्डेयपुराणे च शास्त्रदृष्ट्या रामायणस्याध्ययनमननप्रकारा दर्शिताः । उमागस्त्यपराशरादिसंहितासु रुद्रयामले तन्त्रे गायत्रीवर्णात्मिक दिव्यसहस्रनामस्तोत्रादिषु च सीतायाः प्रभावः, सीतापराशक्तिरिति प्रतिपादितः । ब्रह्माण्डपुराणे तावद्रामायणस्य महामन्त्रत्वेनानुष्ठानविधिरपि प्रदर्शितः । सुन्दरकाण्ड पारायणमाहात्म्यं पारायण प्रकारश्च सविस्तरं प्रदर्शितौ । अत्रायं विशेषः । अध्यात्मरामायणे रामस्यौपनिषद्ब्रह्मस्वरूप निरूपणेन रहस्यं प्रकटीकृतम् । देवी भागवते सीतायाः पराशक्तित्वप्रतिपादनेनापि गूढरहस्याविर्भावः कृतः । वाल्मीकिनापि सर्वं रहस्यमुपदिष्टं परं तन्न क्वापि प्रकटीकृतम् । सुललितपदविन्यासे शोकवीरादिरसपरिपोषात्मकरचनायां च गूढतया निक्षिप्तं ईदृशं परमरहस्यं प्रथमतः काव्ये निबद्धमिति रामायणमादिकाव्यं स्पष्टमेव । किं च भासकालिदासभवभूतिप्रभृतयो महाकवयस्तावन्महर्षेः काव्यरचनाकौशलेनैव सन्तुष्टान्तरङ्गास्तस्या द्वितीयरसभावादिपरिपोषरीतिमेवानुकुर्वन्त स्तद्व्याख्यारूपाण्यलौकिकानन्ददायीनि नवीनानि काव्यानि व्यरचयन् ।

वेदार्थज्ञानायैव खलु सर्वाणि शास्त्राणि पुराणानि च प्रणीतानि । वाल्मीकिकाले साहित्यवाङ्मयस्य नातिविस्तरः । तदानींतने काले वेदानां काव्येभ्योऽव्यवहितपूर्ववर्तित्वमेव । तस्मात्त एव वैदिका विचाराः काव्यात्मना परिणता दृश्यन्त इति स्पष्टमेव । एष विषयः श्रीशेषेन्द्रशर्ममहोदयेनातीव स्पष्टतां नीतः । अत्रैव रचयितुर्मौलिकविचारविचक्षणत्वम् ।

'तोयमल्पमिवादित्यः प्राणानादास्यते शरैः ।' इति रावणं प्रति सीताया उक्तिः । अत्र जलमुपमानं प्राणा उपमेयम् । समानधर्मः क इत्यधुनातना आलङ्कारिकाः संशेरते । तदानीं वेदाध्ययनस्य जागरूकत्वात् 'आपो वा इदं सर्वमिति' यजुषि 'प्राणा आप' इति सुस्पष्टं श्रुत्यैवोक्तम् ।

निशि हनूमतः सीतान्वेषणसमये चन्द्रोदयवर्णनप्रसङ्गे 'ददर्श धीमान् दिवि भानुमन्तं गोष्ठे वृषं मत्तमिव भ्रमन्तम् ।' इति श्लोकार्धो दृश्यते । उपमेयं वैदिकी । नीले नभसि श्वेतश्चन्द्रो रात्रौ तमसा व्याप्ते गोष्ठे श्वेतो वृषा । 'देवीं वाचम जनयन्त' इत्यत्र 'धेनुर्वाक्' इति यदुक्तं तस्माद्देवगृहीते-यमुपमा । एवमेव 'मनो हरसि मे भीरु सुपर्णः पन्नगं यथा ।' इयमुपमापि त्रिसुपर्णाख्यसूक्तादेव सूचिता स्यात् । एवं बहुभिः प्रमाणैः काव्यस्यास्य साक्षाद् वेदमूलकत्वं स्थापितं ग्रन्थकृता । एतेन ग्रन्थकृतो वेदाद्यागमाशास्त्र-प्रावीण्यं साहित्यवैशारद्यं च व्यक्तीभवति । ये रामायणव्याख्याग्रन्था महापण्डितैर्विरचिता बहवो निर्दिष्टास्तेषु तत्तच्छास्त्र सिद्धान्तविशेषाः साधकबाधक प्रमाणप्रदर्शनपूर्वकं प्रतिपादिताः । परमीदृशं मंत्ररहस्यप्रकाशनं न क्वापि दृश्यते । तस्माद् ग्रन्थकृता यत् प्रतिपादितमुपनिषदां ब्रह्माण्डादि पुराणानि महाकविकाव्यानि रामायणरहस्यबोधकत्वाद्रामायणव्याख्याग्रन्था इति तत्सत्यमेवेति प्रतिभाति । किंचानेके प्रमेया ग्रन्थकृता प्रदर्शिताः । स्थालीपुलाकन्यायेन केचिदत्रानूद्यन्ते । सुन्दरकाण्डस्य विशेषतो माहात्म्यमुप-वर्णितम् । साधारणतो रामायणे काण्डरचनाक्रमः कथानायकस्यावस्था विशेषानुरोधेनैव दृश्यते । बालकाण्डे रामजन्मादिकथा, अयोध्याकाण्डे विश्वामित्रयज्ञरक्षणं विवाहादि च, अरण्यकाण्डे रामस्यारण्ये वास, किष्किन्धा-काण्डे हनूमत्समागमो वालिवधश्च । एवं युद्धकाण्ड उत्तरकाण्डेऽपि च कथानायकव्यापार विशेषानुरोधेनैव इतिवृत्तवर्णनम् । मध्ये सुन्दरकाण्डे कश्चन विशेषो दृश्यते । कथानायकेनात्र साक्षात्सम्बन्धो न दृश्यते, किन्तु नायिकासम्बन्धः । सीता जनकतनयेत्यादि साक्षान्नायिकावाचकाः शब्दा न प्रयुक्ताः । सुन्दरीशब्दप्रयोगः कंचिद्विशेषं ज्ञापयति । त्रिपुरसुन्दरी पराशक्ति-रेव सीतेति वस्तुना वस्तुध्वनिः । अत एव सर्वत्र सुन्दरकाण्डपारायण पठना-नुष्ठानसंप्रदायः । रामायणस्य वेदरहस्य प्रतिपादकत्वं तन्त्रशास्त्रदृष्टया साहित्यशास्त्रदृष्ट्या च अभ्युपगम्यते ।

अपि च 'ततो रावणनीतायाः' इति सुन्दरकाण्ड प्रथम श्लोके रावणेन नीतायाः सीतायाः पदमन्वेष्टुं हनूमान् चारणाचरिते पथि इयेषेत्युक्तं वाल्मीकिना। 'चारणा देवगायका' इति प्रसिद्धिः। चारणाश्चान्तरिक्षे संचरन्ति। अयं तावच्छ्लोकस्य पदशक्तिजन्यो वाच्यार्थः। महर्षि संकेतार्थ-स्त्वन्य एव। हनूमान् गगने पुप्लुव इति वक्तव्ये चारणाचरितमार्गगमन-पर्यन्तमनुधावनं किमिति चेत्, अत्र शब्दप्रयोग एव परमं रहस्यम्। चरणशब्दः कुण्डलिनी वाचकः। ललितासहस्रनामभाष्ये 'बिसतन्तुतनीयसी'ति नाम-व्याख्यावसरे श्रीमद्भिर्भास्कररायमहाशयैश्चरण शब्दश्चरति यातायातं करोतीति कुण्डलिनीपरः। सामान्ये नपुंसकमित्युक्तम्। सीता पराशक्तिरेव, पराकाशगता, ब्रह्मणोऽभिव्यक्तिस्थानम्। अत एव पराकाशायै नमो गगनावस्थायै नम इत्यादि संगच्छते। अत्र 'हनूम'च्छब्दोऽपि विशेषमर्थं सूचयन्ति। मारुतात्मज आञ्जनेय इत्यादि नामवाचकाः शब्दा न क्वापि प्रयुक्ताः। 'अन्तरेण तालुके य एष स्तन इवावलम्बते, सेन्द्रयोनिरिति तैत्तिरीय प्रमाणानुसन्धानेन हनूमच्छब्दस्य सुषुम्नैवार्थः। पवनात्मजोऽस्मिन् काण्डे 'हनूमान्' इति शब्देनैव व्यवहृतः। इदं तस्य दीक्षानाम। अनयैव दिशा सर्वोऽपि सुन्दरकाण्डार्थः कुण्डलिनीयोगपरत्वेन व्याख्यातः। अन्यच्च, हनूमता सीता दृष्टा, कीदृशी ?

ददर्श शुक्लपक्षादौ चन्द्रलेखामिवामलाम्। 'प्रतिपच्चन्द्रलेखेव दृश्यते द्योतते न च।' इत्यपि पाठान्तरम्। साहित्यशास्त्र दृष्टया सीता प्रियविरहेण वनवासेन चातीव कृशा, इत्यलङ्कारेण वस्तुध्वनिः। नैतावता निर्वाहः। प्रतिपच्चन्द्रलेखा ध्रुवकला आत्मकला। प्रतिपदि या त्रिपुर सुन्दरी कथिता सा चिद्रूपात्मिकेति – 'सौन्दर्यलहरी' व्याख्यायां लक्ष्मीधरः। अभूतेनापवादेने त्यादि श्लोकेषु बुद्ध्यादयः शब्दाः प्रयुक्तास्ते सर्वेऽपि तस्याः पराशक्तेरेव नामानि। सप्तशतीग्रन्थे ब्रह्मकृतयोगनिद्रास्तुतावेतानि सर्वाणि नामानि प्रदर्शितानि। किंच, 'मया रामस्य राजर्षेर्भार्यया परमात्मनः' (सुन्दरकाण्डे 26.40) इत्यत्र परमात्मनो भार्या सीतेति श्रुत्यैव प्रतिपादितम्।

एवमेव त्रिजटास्वप्नो न केवलं व्यावहारिको ज्योतिषशास्त्रोक्तदिशा भाविशुभसूचक एव, किन्तु रहस्यपूर्णो गायत्रीमन्त्रमय इति दर्शितं ग्रन्थकारेण।

अत्र त्रिजटेति राक्षसी न। किन्तु साक्षाद् गायत्री। 'त्रिजटा तित्तिरी तृष्णा त्रिविधा तरुणाकृतिः।' इति गायत्री सहस्रनामस्तोत्रे पङ्क्तिर्वर्तते। (देवीभागवते XII 6.72)। स्वप्ने हंसचतुर्दन्त गजवृषभाणां श्वेतवर्णानां दर्शनं श्रीरामचन्द्रदर्शनं च गायत्र्या द्योतकम्। गायत्री त्रिरूपिणी त्रिपदा च प्रातःकाले गायत्री मध्याह्ने सावित्री सायं सरस्वतीति। तिसृणां वाहनानि क्रमेण हंसो गजो वृषभश्च। एवमेव 'दन्त' इति शब्देन द्वात्रिंशदिति गजशब्देनाष्टेति संख्या ज्ञायते। तेन चतुष्पदा गायत्री द्वात्रिंशदक्षरा। एतद्रहस्यार्थबोधक एव त्रिजटास्वप्नः।

एवं कुशाग्रधिषणो ग्रन्थकृद्रामायणे तान्त्रिकरहस्यानि गूढानि प्रदर्श्य तस्य सर्वमहत्त्वं स्थापयति। रामायणं भारतं च तुलनात्मकदृष्ट्या सम्यक् परिशील्य रामायणं वाल्मीकिनादावेव प्रणीतमनन्तरं वेदव्यासो महाभारतं व्यरचयदिति सप्रमाणं प्रतिपादयति। अद्यत्वे रामायणं भारतानन्तरं प्रणीतमिति वादः पाश्चात्त्यविपश्चित् प्रवरैरुत्थापितः। विशेषतः पाश्चात्यानुकरण प्रवृत्तेषु भारतीय पण्डितमण्डलीषु जागर्ति। ग्रन्थकृता प्रदर्शिताभिर्युक्तिभिः प्रमाणैश्चाधुनिको वादोऽयं पूर्णतया निराकृत इति स्पष्टमेव प्रतिभाति। किंच, भारतं रामायणरचनां शब्दशोऽर्थशश्चानुसृत्यैव रचितम्। कृतेऽप्यनुकरणे शब्दार्थौचित्यदृष्ट्या विषयप्रतिपादनरीतिदृष्ट्यापि रामायण महाभारतयोरन्तरं स्पष्टतया प्रतीयते। रचनायां वैलक्षण्यद्योतकाः परः शताः श्लोका महता प्रयत्नेन ग्रन्थकृता संगृहीताः।

यथा रामायणे – देवताभिः समा रूपे सीता श्रीरिव रूपिणी।
भारते – श्रुत्वाऽथ तस्य तं शब्दं कन्या श्रीरिव रूपिणी।
रामायणे – अनेकगन्धप्रवहं पुष्पगन्धमनोहरम्।
भारते – मधुगन्धैश्च संयुक्तं पुष्पगन्धमनोहरम्।
इत्यादि।

किं च रामायणे विष्णुपारम्यापेक्षया सर्वत्रेन्द्रपारम्यमेव स्थापितमिति ग्रन्थकृन्मन्यते। 'इन्द्राविष्णू' इति प्रकरणे वेदेषु य इन्द्र इति वर्णितः स एव पुराणेषु विष्णुत्वेन परिणत इति प्रमाणानि दर्शयति। विस्तरभयात्तान्यत्र न

प्रदर्शितानि। अभिज्ञान शाकुन्तल नान्दीश्लोको महता विस्तरेण देवीपरत्वेन व्याख्यातः।

श्रीमच्छेषेन्द्रशर्मामहोदयोऽपूर्वप्रतिभाशाली। आगमेष्वधीती। साहित्य-मर्मज्ञः। तेन महता श्रमेण प्रमेया अपूर्वाः संशोधिताः। आधुनिका भारतीयाः केचन विश्वविद्यालयेष्वाचार्यपदवीमलंकुर्वन्ति। विद्वांसोऽपि ते पाश्चात्य-विचारानुकरणशीला जडप्राधान्यवादिनो जडभिन्नचैतन्यास्तित्वे संशयाना भिन्नचैतन्यास्तित्वमङ्गीकुर्वाणोऽपि प्राचीनवैदिकसंप्रदायेषूदासीना एव प्रायशो वर्तन्ते। तेषामाग्रहमीलितलोचनानां लोचनोन्मीलनाय श्रुत्यन्तप्रदीप्त पारमहेश्वरज्ञानाञ्जनशलाकेति षोडशीग्रन्थोऽयमित्यलम्।

– प्लवंग 1967